B.A./2nd Sem (H)/SANS/24(CBCS)

# 2024

## 2nd Semester Examination

## SANSKRIT (Honours)

### Paper : C 4-T

### (Self Management in the Gita)

### [CBCS]

Full Marks : 60 | Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. दशानां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×10=20

(क) श्रीमद्भगवद्गीतायाः वक्ता कः ? कश्च श्रोता ?

(ख) श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य पञ्चमाध्यायस्य च नाम लिखत।

(ग) 'परन्तपः' इत्यस्य का व्युत्पत्तिः ? एतेन को बोध्यते।

(घ) कर्मयोगः इत्यनेन कः बोध्यते ?

(ङ) जीवदेहे तमोगुणस्य प्रभावः कीदृशः भवति ?

P.T.O.

(च) जीवशरीरे रजोगुणस्य वृद्धिः कथं जायते ?

(छ) कः स्थितप्रज्ञः भवति ?

(ज) 'स च मम प्रियः' इत्यत्र कः कस्य प्रियो भवति ?

(झ) 'पञ्चैतानि महावाहों कारणानि' इत्यत्र पञ्चकारणानि कानि ?

(ञ) 'त्रिविधं नरकस्येदं द्वारम्' — त्रिविधं द्वारं किम्।

(ट) अव्यवसायिनां बुद्धिः किदृशी भवति ?

(ठ) प्रकृतेः अष्टौ भेदाः के भवन्ति ?

(ड) बुद्धिः कतिविधा ? काश्च ताः ?

(ढ) आहारः कतिविधः ? के च ते ?

(ण) मनसः नियन्त्रणं कथं दुष्करं भवति ?

2. चत्वारः प्रश्नाः समाधेयाः। एकस्य उत्तरं संस्कृतभाषया देवनागरीलिप्या च देयम् — 5×4=20

(क) श्रीमद्भगवद्गीतायाः प्रथमश्लोकं व्याख्यात।

(ख) का नाम श्रद्धा ? कतिविधा च सा ? तासां स्वरूपं वर्णयत।

(ग) व्यवसायात्मिका बुद्धिः का भवति ?

(घ) मनसः स्वरूपं वर्णयत।

(ङ) अहंकारस्य समर्पणं कथं सम्भवति ? गीतामाश्रित्य लिख्यताम्।

(च) श्लोकं व्याख्यात —

श्रद्धावांल्लभते ज्ञानं तत्परः संयतेन्द्रियः।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति।

3. द्वौ प्रश्नौ समाधेयौ — 10×2=20

(क) गुणः कः ? स च कतिविधः ? तेषां स्वरूपं गीतानुसारम् आलोचयत।

(ख) ध्यानं किम् ? ध्यानयोगस्य साधन-पद्धतिः वर्णनीया।

(ग) श्रीमद्भगवद्गीतानुसारं निष्कामकर्मयोगः व्याख्येयः।

(घ) श्रीमद्भगवद्गीतानुसारं ज्ञानस्य महत्त्वं प्रतिपादयत।

---